# पितृ-सूक्तम्

## संस्कृत

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥१॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥२॥

आहंपितृन् त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः।
बर्हिष्यदो ये स्वधया सुतस्य भजन्त पितरस्त इहागमिष्ठाः ॥३॥

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्।
त आ गतावसा शंतमे नाथा नः शं योरऽपो दधात ॥४॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥५॥

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरूषता कराम ॥६॥

आसीनासो अरुणीनाम उपस्थे रयिं धत्त दाशुषे मर्त्याय।
पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात ॥७॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥८॥

ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः।
आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥९॥

ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः
सरथं दधानाः।
आग्ने याहि सहस्त्रं देववन्दैः परैः पूर्वैः
पितृभिर्घर्मसद्भिः ॥१०॥

अग्निष्वात्ता पितर एह गच्छत सदः सदः
सदत सुप्रणीतयः।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं
सर्ववीरं दधातन ॥११॥

त्वमग्न ईळतो जातवेदोऽवाड्ढव्यानि
सुरभीणि कृत्वी।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव
प्रयता हवींषि ॥१२॥

ये चे पितरः ये च नेह यांश्च विद्म यं च न
प्रविद्म।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्वज्ञं
सुकृतं जुषस्व ॥१३॥

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः
स्वधया मादयन्ते।
तेभिः स्वराडसुनीतिमेतां यथावशं तन्वं
कल्पयस्व ॥१४॥